श्रीगणेशाय नमः ॥ ऋषिरुवाच ॥ शक्रादयः सुरगणाः सर्वे देवा इन्द्रपुरोगमाः । स्तुतिमारेभिरे कर्तुं निहते महिषासुरे ॥१॥ शक्रादयः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशिरोधरांशा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥२॥ देवा ऊचुः ॥ देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ॥ तामंबिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः ॥३॥ यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलं बलं च [illegible] परिपालनाय नाशाय चाशु

हे पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥८॥
या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्व
सारैः ॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भग
वती परमा हि देवि ॥९॥ शब्दात्मिका सुविमलर्ग्यजुषां निधान
मुद्गीथरम्यपदपाठवतां च साम्नां ॥ देवि त्रयी भगवती भव
भावनाय वार्त्ता च सर्वजगतां परमार्त्तिहंत्री ॥१०॥ मेधासि दे
वि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसं
गा: श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौ
लिकृतप्रतिष्ठा ॥११॥ ईषत्सहासममलं परिपूर्णचन्द्रबिम्बा

भयस्य मतिं करोतु ॥४॥ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः श्रद्धा सतां कुलजनप्रभवस्य
लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥५॥ किं वर्णयाम
तव रूपमचिन्त्यमेतत् किं चातिवीर्यमसुरक्षयकारि भूरि
किं चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुरदेवगणा
दिकेषु ॥६॥ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे ह
रिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदं जगदंशभूतम
व्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥७॥ यस्याः समस्तसुरता
समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि स्वाहासि ॥

ष्ववर्ज्जः ॥ धन्यास्त एवहि मर्त्ता मजन्म त्यदाता पेषां सदा भु
द्यदभवति प्रसन्ना ॥१२॥ धर्म्मार्थ्यादि विमकलानि मृदेव
कर्म्मा तपस्या व्रतः प्रति दिनं सुकृती करोति ॥ स्वर्गं प्रयाति
च तनो भवती प्रसादात्त्वो जत्र पेपि फलदानमनुदेवि तेन ॥१३॥
दुर्गेस्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिम
तीवशुभां ददासि ॥ दारिद्र्यदुःखभयहारिणि कात्वदन्यास
र्वोपकारकरणाय सदार्द्रचित्ता ॥१४॥ इमि हितैर्जगदुपैति सु
खं नृपैर्न कुर्वन्तु नाम नरकाय चिराय पापं तेम्ना सम्तु

नुकारि कनकोत्तमकान्तिकान्तम् ॥ अत्यद्भुतं प्रहृतमात्त
रुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥१२॥ दृष्ट्वा
तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि य
न्न सद्यः प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि
कुपितान्तकदर्शनेन ॥१३॥ देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ॥ विज्ञातमेतदधुने
व यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥१४॥ ते
संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति व

ति तेन त्वं लालयेत्थम् ॥२०॥ केनोपमा भवतु तेस्य पराक्रमस्य
पंच शत्रुमपकार्य तिहारि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता
च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेपि ॥२३॥ त्रैलोक्यमेत
दखिलं रिपुनाशनेन त्रातं त्वया समर [illegible] मू
र्द्धनि तेपि हत्वा नीता दिवं रिपुगणा भयमप्यपास्तमस्मा
कमुन्मदसुरारिभवं नमस्ते ॥२४॥ शूलेन पाहि नो देवि पा
हि खड्गेन चाम्बिके ॥ घण्टास्वनेन नः पाहि चापज्यानिःस्वने
न च ॥२५॥ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ [illegible]

मधिगम्य दिवं प्रयान्तु मतेति नूनमहितान्विनिहंसि देवि ॥१९॥
दृष्ट्वैव किन्न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणो
षि शस्त्रं ॥ लोकान्प्रयान्तु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भव
ति तेष्वहितेषु साध्वी ॥२०॥ खड्गप्रभानिकरविस्फुरणैस्तथो
ग्रैः शूलाग्रकान्तिनिवहेन दृशो सुराणां यन्नागता विल
यमंशुमदिन्दुखण्डयोग्याननं तव विलोकयतां तदेतत् ॥२१॥
दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिन्त्यमतु
ल्यमन्यैः वीर्यं च हन्तृ हृतदेवपराक्रमाणां वैरिष्वपि प्रक

कर्तव्यमपरं यच्च दुःकरं तन्निवेधताम् ॥ देवा ऊचुः ॥ भगवत्या कृ
तं सर्वं न किंचिदवशिष्यते ॥३४॥ यदयं निहतः शत्रुरस्माकं
महिषासुरः ॥ यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥३५॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ यश्च मर्त्यः
स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥३६॥ तस्य वित्तर्द्धिविभ
वैर्धनदारादिसंपदाम् ॥ वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः
सर्वदाम्बिके ॥३७॥ ऋषिरुवाच ॥ इति प्रसादिता देवैर्जगतो
ऽर्थे तथात्मनः ॥ तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप
॥३८॥ इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥ देवी देवशरीरे

नरोनात्मभूरसस्य ऽनरस्यांतपेश्वरी ॥२५॥ सौम्यानियानि रूपा
णि त्रैलोक्ये विचरन्ति ते ॥ यानि चात्यन्तघोराणि तैरक्षास्मांस्त
थाभुवम् ॥२६॥ खड्गशूलगदादीनि यानि चास्त्राणि तेम्बि
के करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥२७॥ ऋषिरुवा
च ॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ॥ अर्चिता ज
गतां धात्री तथा गंधानुलेपनैः ॥२८॥ भक्त्या समस्तैस्त्रिद
शैर्दिव्यैर्धूपैस्तु धूपिता ॥ प्राह प्रसादसुमुखी समस्तान्प्र
णतान्सुरान् ॥२९॥ देव्युवाच ॥ व्रियतां त्रिदशाः सर्वे यदस्म
त्तोभिवांछितम् ॥ ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपूजिता ॥३१॥

देव्यो जगत्त्रयहितैषिणी ॥३७॥ पुनश्च गौरीदेहात्सा समुद्भूता य
थाऽभवत् ॥ वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥३८॥ र
क्षणाय च लोकानां देवानामुपकारिणी ॥ तच्छृणुष्व मया
ख्यातं यथावत्कथयामि ते ॥४०॥ इति मार्कंडेयपुराणे साव
र्णिके मन्वन्तरे देवीमाहात्म्ये शक्रादिस्तुतिः ॥ छ ॥ ४ ॥ ॥॥

॥६॥

6